**Indian Journal of Modern Research and Reviews**

**This Journal is a member of the *'Committee on Publication Ethics'***

**Online ISSN:** 2584-184X

**Review Article**

# The Concept of Siblings According to Saṅketanidhi

## संङ्केतनिधिग्रन्थानुसारेण भातृविचारः

**AUTHOR(S):** Lakshmikanta Nayaka

**ABSTRACT:**

The principal findings of this research may be summarized as follows:

1. The analysis of siblings (*Bhratri-Vichara*) should primarily be conducted by considering the house (Bhava), lord of the house (Bhavesha), significator planet (Karaka), planetary aspects (Drishti), conjunctions (Yuti), Navamsha, and the strength or weakness of the relevant planets.
2. The rules concerning the happiness, welfare, and loss of siblings described in *Sanketanidhi* and other classical horological texts are mutually consistent, and their systematic integration is possible through comparative analysis.
3. Several classical authorities maintain that the number of siblings may be determined through the number of signs or Navamsha divisions associated with the third house, the number of planetary aspects upon the third house, or the Navamsha positions of the third-house lord and the planetary significator of siblings.
4. The predominance of benefic planets is generally associated with an increase in the number of siblings, mutual affection, harmony, and financial cooperation among siblings. Conversely, the predominance of malefic planets may indicate loss of siblings, misfortunes, diseases, and physical marks or distinctive bodily characteristics.
5. The principle of correspondence between the third and sixth houses serves as an important guiding principle in the analysis and interpretation of results concerning siblings.

The study establishes that the analysis of siblings (*Bhratri-Vichara*) constitutes an integrated, evidence-supported, and research-oriented subject within Horary Astrology (Hora Shastra). A systematic consideration of houses, planetary significators, aspects, conjunctions, Navamsha positions, and planetary strength provides a comprehensive framework for interpreting matters related to siblings.

**KEYWORDS**: Sibling House in the Horoscope, General Rules of Sibling Analysis, Determination of the Number of Siblings, Results Based on Planetary Aspects and Positions, Sibling Happiness, Analysis of Adversities and Afflictions.

-अस्य शोधकार्यस्य सारभूताः निष्कर्षाः संक्षेपेण अधोलिखितरूपेण प्रस्तूयन्ते -

1. भ्रातृविचारं भावः, भावेशः, कारकग्रहः, दृष्टिः, युतिः, नवांशः तथा बलाबलसमन्वयेन करणीय इति प्रधानाधारः अस्ति।
2. संकेतनिध्यादिहोराग्रन्थेषु प्रतिपादिताः भ्रातृसौख्यहानिसम्बद्धाः नियमाः परस्परं संगताः सन्ति तथा तुलनात्मकाध्ययनेन तेषां समन्वयः सम्भवति।
3. भ्रातृसंख्यानिर्णयः तृतीयभावस्थराशिनवांशसंख्यया, तृतीयस्थग्रहदृष्टिसंख्यया, अथवा तृतीयेश–भ्रातृकारकग्रहयोः नवांशस्थित्या निर्णेय इति बहवः आचार्याः अभ्युपगच्छन्ति।
4. शुभग्रहप्राधान्ये भ्रातृवृद्धिः, सौहार्दं, धनसहयोगः च दृश्यते; पापग्रहप्राधान्ये तु भ्रातृनाशः, अरिष्टानि, रोगाः, शरीरिकचिह्नानि च सम्भवन्ति।
5. तृतीयभावषष्ठभावयोः साम्यसिद्धान्तः भ्रातृफलविवेचने महत्त्वपूर्णः मार्गदर्शकः सिद्धान्तः अस्ति।

अस्य अध्ययनस्य फलस्वरूपं भ्रातृविचारः होराशास्त्रे समन्वितः, प्रमाणसमर्थितः, तथा अनुसन्धानोपयोगीः विषय इति प्रतिष्ठापितः।

**शब्दकुञ्चिका:** कुण्डल्यां भातृस्थानम् , भातृविचारस्य सामान्यनियमाः, सहोदरसंख्यानिर्णयः, ग्रहाणां दृष्टिः स्थितिः च वशात् फलानि, भातृसौख्यम् अरिष्टानां च विचारः।

***Article History***

- **ISSN**: 2584-184X
- **Received:** 22 May 2024
- **Accepted**: 29 June 2024
- **Published:** 30 June 2024
- **MRR:**2(6) June 2024: 43-45
- **©2024, All Rights Reserved**
- **Peer Review Process:** Yes
- **Plagiarism Checked**: Yes

***Authors Details***

**Lakshmikanta Nayaka**
Research Scholar, Department of Astrology and Vastu, Rashtriya Sanskrit University, Tirupati, Andhra Pradesh, India

***Corresponding Author***

**Lakshmikanta Nayaka**
Research Scholar, Department of Astrology and Vastu, Rashtriya Sanskrit University, Tirupati, Andhra Pradesh, India

© 2024 Lakshmikanta Nayaka. This is an open access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND) https://creativecommons.org/licenses/by/4.0/

**उपोद्घातः** ज्योतिषशास्त्रं भारतीयदर्शनपरम्परायां मानवजीवनस्य सर्वाङ्गीणविवेचनाय एकं प्राचीनं तथा प्रमाणभूतं शास्त्रम् इति सुविदितम्। अस्मिन् शास्त्रे जन्मकुण्डल्याः विविधभावानां माध्यमेन मनुष्यस्य आयुः, स्वभावः, सम्बन्धाः, सुखदुःखानि च सूक्ष्मतया निरूप्यन्ते। तेषु भावेषु तृतीयभावः विशेषरूपेण सहोदराणां, पराक्रमस्य, श्रवणेन्द्रियस्य, बाहुबलस्य, मातुः मातुलपितृव्यादिसम्बन्धानां च विचारार्थं निर्दिष्टः।

1. होराशास्त्रीयग्रन्थेषु संकेतनिधिः, शम्भुहोरा, सर्वार्थचिन्तामणिः, फलदीपिका, मानसागरी, जातकपारिजातः इत्यादयः भ्रातृविचारं बहुविधैः नियमैः, योगैः, दृष्टिसंयोगैः च निरूपयन्ति। एतेषां ग्रन्थानां तुलनात्मकाध्ययनेन ज्ञायते यत् भ्रातृसौख्यं वा भ्रातृनाशः केवलं तृतीयभावस्थितिग्रहैः एव न, अपि तु तृतीयेशस्य, भ्रातृकारकभौमस्य, शुभाशुभदृष्टियुतिसम्बन्धानां च समग्रपरिशीलनेन निर्णेयः। अस्य शोधलेखस्य उद्देश्यं भवति संकेतनिध्यनुसारं भ्रातृविचारस्य सिद्धान्तानां संग्रहम्, विभिन्नहोराग्रन्थेषु प्रतिपादितानां मतानां समन्वयः, तथा तृतीयभावस्य षष्ठभावसदृशफलप्रतिपादनस्य विवेचनं च। एषः अध्ययनः न केवलं शास्त्रीयदृष्ट्या, अपि तु प्रयोगात्मकज्योतिषदृष्ट्याऽपि अत्यन्तोपयोगी इति निस्सन्देहं वक्तुं शक्यते।

**कुण्डल्यां भातृस्थानम् -**

तृतीयभावः भातृभावः इति प्रसिद्धः। भातृविचबाहुः, मातुः पितृव्यः, मातुः मातुलः, दासी, श्रवणेन्द्रियः तथा विक्रमोपि तृतीयभावाद् विचार्यते।

**बाहुस्तृतीयं सहजाख्यमत्र त्वम्बापितृव्याम्बकमातुलादेः।**
**दास्यादिकानां श्रुतिविक्रमादेर्भातुः फलं वाच्यमतः सुधीभिः॥[i]**

**भातृविचारस्य सामान्यनियमाः -**

यदि तृतीयभावः शुभग्रहस्य राशिः भवति अपिच शुभग्रहेण दृष्टः युतः च भवति तर्हि जातस्य भातृसुखं, भातृसकाशात् धनं च सिद्ध्यति। यदि शनिः तृतीये भवति तस्योपरि भौमस्य दृष्टि भवति तदा भातृनाशः च जायते।परन्तु शुक्रभोमयोः दृष्टिः चेत् भ्रातृणां कृते शुभानि भवन्ति।

**सत्त्सम्प्रयुक्तं सहजे शुभर्क्षं दृशासतां भातृसुखार्थसिद्ध्यै।**
**कुजेक्षितस्तत्र शनिः सहोत्थक्षयाय शुक्रेज्यदृशा शुभं स्यात्॥[ii]**

**वि.द्र. -** फलदीपिकायां यदि तृतीयाधिपः बली स्यात्, शुभग्रहेण युक्तः, तृतीयभावस्य कारकः भौमः बली तथा शुभग्रहयुतः शुभस्थानङ्गतः च भवेत् तर्हि जातकस्य भातृणां बृद्धिं भवति। यदि तृतीयाधिपः कारकग्रहः च दुर्बलः, दुःस्थानगतः, पापयुतः च स्यात् तर्हि जातकस्य भातृनाशः भवति। यथा -

**शौर्यपे बलिनि सद्गहयुक्ते कारकेऽपि शुभभावमुपेते।**
**भ्रातृवृद्धिरथ वीर्यविहीने दुःस्थिते भवति सोदरनाशः॥ *[iii]***

सर्वार्थचिन्तामणौ उक्तं यत् भातृकारकः ग्रहः केन्द्रे, त्रिकोणे, स्वोच्चे, स्वमित्रक्षेत्रे, स्ववर्गे, स्वनवमांशे स्थितः चेत् भातृलाभः वाच्यः।

**भ्रातृपे कारके वाऽपि शुभयोगनिरीक्षिते।**
**भावे वा बलसम्पूर्णे भ्रातृणां वर्धनं भवेत्॥**
**केन्द्रत्रिकोणगे वाऽपि स्वोच्चमित्रस्ववर्गगे।**
**नाथे वा कारके वाऽपि भ्रातृलाभमुदीरयेत्॥[iv]**

यदि सहजभावेशः सौम्यग्रहैः युतः, सौम्यग्रहस्य नवांशे स्थितः तथा तृतीयभावे भावेशः अथवा भावकारकग्रहः स्थितः चेत् तर्हि भ्रातृणां वृद्धिः भवति।

**सौम्यग्रहान्विते वाऽपि सौम्यानामंशके यदि। नाथे वा कारके वाऽपि भावे सोदरवर्धनम्॥[v]**

**सहोदरसंख्यानिर्णयः**

यदि तृतीये गृहे स्वस्य राशेः बृहस्पतिः तिष्ठति तर्हि भातृसुखं भवति। तथा च तृतीये शनिः भवति तर्हि भाग्यम् अधिकं भवति। तृतीये गृहे शनिसहितं राहुः भवति चेत् दुर्नखत्वं भवति। एवं च दक्षिणे करे काष्ठप्रहारस्य चिह्नं तथा च वातव्याधियुक्तं भवति। तृतीये गृहे भौमः, सूर्यः वा भवति चेत् दक्षिणहस्तस्य अस्थिभङ्गः, हिंसककर्मकारी च भवति। यदि भातृभावे सौम्यः ग्रहः अस्ति तर्हि अस्थिभङ्गः न भवति।तथा च जन्मसमये तृतीयगृहे यावन्तो नवांशाः वलिभौमेन्दुभ्यां दृष्टाः उदिताः तत् समास्तत्संख्याकाः सहोदरा इति वाच्याः।

**स्वर्क्षे जीवे भ्रातृगे भ्रातृसौख्यं मन्दे भ्रातृस्थे तु भाग्याधिकः स्यात्।**
**बाहौ राहौ सार्ककेजे दुर्नखत्वं दक्षे हस्ते दारुघातोऽनिलात्तिः॥**
**एवं कुजेऽर्के च तदस्थिभङ्गः स्याद्दुष्करत्त्वं विकृतिर्न सौम्ये।**
**भोमेन्दुदृष्टाः सहजे नवांशा यावन्मितास्तत्समसोदराः स्युः॥[vi]**

**वि.द्र.-** शम्भुहोरायामपि एतत् सर्वं फलमुक्तमस्ति।*[vii]* सर्वार्थचिन्तामणौ सहोदरसंख्याज्ञानार्थम् उक्तं यथा- जन्मकुण्डल्यां तृतीयभावे स्थितस्य राशिनवांशस्य अनुसारं भ्रातृसंख्या ज्ञेया। अथवा तृतीयेशस्य भ्रातृकारकग्रहस्य च यः राशिनवांशः तत् नवांशसंख्यया भ्रातृसंख्या ज्ञेया। जन्मकुण्डल्यां तृतीयभावस्थग्रहस्य राशि नवांशस्य अनुसारं भ्रातृसंख्या वक्तव्या, अथवा तृतीयेशस्य या राशिनवांशसंख्या तथा भ्रातृकारकग्रहस्य भावस्थित्यनुसारेण भ्रातृसंख्या ज्ञेया।

**भ्रातृराश्यंशकवशाद्भ्रातृसंख्यां विनिर्दिशेत्।नाथकारकसंयुक्तराश्यंशाद्वा भवेत् तथा॥**
**भ्रातृराशिसमायुक्तखेचरस्यांशकाद्वदेत्। त्येशयुक्तराश्यंशात्कारकान्वितभावतः॥[viii]**

सारावल्यानुसारेण जन्मकाले तृतीयभावे या नवांशसङ्ख्या भवति, तावती संख्यातुल्यभ्रातृणां जन्म भविष्यति। तृतीयभावे यतसंख्यकानां ग्रहाणां दृष्टिः भवति तेषां सङ्ख्यया भ्रातरः भविष्यन्ति। अथवा बहवः भ्रातरः भवन्तीत्यर्थः।

**यावन्तो नवभागा यदागताः सहजराशौ तु।**
**तत्संख्यां कुर्वन्ति च दृष्टास्त्वन्यैस्तथा बहवः॥[ix]**

शम्भुहोरानुसारेण भौमः सूर्यो वा तृतीयस्थो भवेत् तर्हि जातकस्य अस्थिभङ्गः तथा च विषभयं, ज्वलनात् चिह्नं दाहं च करोति। यथा -

**रविर्यदा हस्तगतः कुजो वा तदाऽस्थिभङ्गं विषजं भयं च ।**
**करोति दाहं ज्वलनाच्च चिह्नं शुभेक्षिते त्वग्विरलत्वमेति॥[x]**

**ग्रहाणां दृष्टिः स्थितिः च वशात् फलानि-**

स्वराशितः सूर्यः नवमे गृहे भवति तदा भ्रातृविनाशः। यदि कश्चित् जीवति तर्हि केवलं अनुजः एव राज्ञसदृशः भवितष्यति। तृतीयस्थे चन्द्रः पापै पूर्णं दृष्ट्या दृष्टः तर्हि भ्रातृणां नाशः करोति। परन्तु सूर्यः तृतीये तिष्ठति तर्हि अग्रजानां कृते, यदि मंगलः तिष्ठति अनुजभ्रातृणां कृते रिष्टं भवति। यदि च शनिराहू वा भवतः तर्हि ज्येष्ठान् कनिष्ठान् च सर्वान् भ्रातृन् नाशयति। मंगलः तृतीये गृहे स्थितः क्रूरग्रहैः दृष्टः तर्हि तत् बाहौ शस्त्रात् क्षतचिह्नम् अस्ति इति वक्तव्यम्।अपिच एतस्य योगे अनुजस्य कण्ठे पित्तकृत्रोगस्य लक्षणं भवति। तथा च तस्मिन् एव तृतीयस्थाने शुभग्रहैः सह दुष्टग्रहाः उपविष्टाः तर्हि बाहौ क्षतस्य लक्षणं वातज्वरादिरोगः वा भवति। अथवा पक्षाघातादिकं रोगं भवति एवं च तस्य भार्या द्यूतक्रिडाप्रियः भवति।

**भानौ भाग्ये स्वर्क्षगे भ्रातृनाशश्चेज्जोवेदेकोऽनुजो राजतुल्यः।**
**दुष्टैर्दृष्टोब्जोऽखिलान् हन्ति बाहो जेष्ठानर्कोस्रोनुजाञ्छन्यगुस्तान्॥**
**भुजे कुजे क्रूरदृशायताङ्कितं क्षताच्च पित्तादनुजे गले रुजा।**
**सशत्रवस्तत्र खला भुजव्यथा गरुन्मरुद्यूतपराबलाबलात्॥[xi]**

**वि.द्र.-** शम्भुहोरानुसारेण रविः सिंहराशिस्थे नवमे च भवति तर्हि भातृनाशः भवति। परन्तु कदाचित् एकः सहजः जीवेत्तदा सः चिरायुः भुपतिना समं वा भवति। यथा –

**चेदत्र भानौ नवमे स्वगेहे तदा विनश्यत्यखिलाः सहोत्थाः।**
**एकश्चिरायुः सहजः कदाचित् नृणां भवेद्भूपतिना समो वा॥[xii]**

मानसागर्यनुसारेण यदि चन्द्रमा तृतीयभावे पापराशिस्थे स्थिते वर्त्तते तर्हि जातकस्य भातृनाशः भवति। यथा -

**शशिनि सहजसंस्थे पापगेहे च नित्यं न भवति बहुभाषी भ्रातृहर्त्तारिमूर्तिः ।**
**भवति च सुखभोगी सौम्यगे रात्रिनाथे सकलधननिधानं शास्त्रकाव्यप्रमोदी॥[xiii]**

मानसागर्यामपि सूर्यादिग्रहाणां स्थितिवशात् किञ्चित् विषयभेदः दृश्यते। यथा - तृतीयस्थाने सूर्यः भवति चेत् ज्येष्ठभ्रातरं नाशयति। तत्र मङ्गलः शनिश्च स्तः तर्हि कनिष्ठभ्रातरम् नाशयति। राहुः तिष्ठति तर्हि सः ज्येष्ठभ्रातरं कनिष्ठं च उभयोरपि नाशकारकः भवति। किन्तु तत्र केतुः स्थितः तर्हि सः शुभफलप्रदः भवति, सर्वाणि अनिष्टानि च निवारयति।

**आदौ जातं रविर्हन्ति पश्चाद्भौमशनैश्चरौ।राहुनामा ह्युभौ हन्ति केतुः सर्वनिवारकः॥[xiv]**

यदि तृतीयभावे केवलं शनिः भवति तर्हि सर्वसहोदरनाशकः भवति। यथा -

© 2024 Lakshmikanta Nayaka. This is an open access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND) https://creativecommons.org/licenses/by/4.0/

**"सहजमन्दिरगे तपनात्मजे भवति सर्वसहोदरनाशकः।"[xv]**

**जातकपारिजाते अपि –**

भ्रातृस्थाने यदि शुभयुते सोदराणां चिरायुः पापाक्रान्ते सहजभवने पापदृष्टे विनाशम्।
शनिः तृतीयस्थः चेत् दौ भ्रातरौ गर्भयुतौ विनष्टौ। तथा भातृपक्षतः एव धनस्य हानि इति शम्भुहोरायाम् -

**चेद्विक्रमस्थेऽर्कसुते प्रवाच्यौ द्वौ भ्रातरौ गर्भयुतौ विनष्टौ।**
**सहोत्यपक्षाश्रित एव नूनं द्रव्यस्य हानिर्मनुजस्य वाच्या॥ [xvi]**

**पुनः भातृसौख्यम्, अरिष्टानां च विचारः -**

शनिः सप्तमस्थः, राहुः नवमस्थः, मंगलः एकादशे च भवति तर्हि भ्रातृहानिः। शनिः दुष्टग्रहैः दृष्टः तर्हि भ्रातृणां हानिः। बुधः, बृहस्पतिः, शुक्रः वा तृतीयभावे उपविष्टः सन्ति तर्हि भ्रातृभ्यः शुभं भवति। यदि एभिः ग्रहत्रयैः सह पापग्रहाणां युतिः दृष्टिर्वा अस्ति तर्हि एकः अग्रजः, एकः अनुजः च नष्टो भवति। नवमे चन्द्रः, तृतीये शनिराहू शुभग्रहेण दृष्टः युतः च स्यात् तदा भगिनीत्रयं नश्यति। अपिच बाह्वोः कुक्षौः वा चिह्नं भवति। राहुणा दृष्टः शुक्रः तृतीयभावे भवति तर्हि भगिनी विषसेवनात् म्रियते, तथा यदि शनिः राहुणा दृष्टं शुक्रं पश्यति तर्हि सर्पभयं भवेत्। तथा तृतीये भावे दुष्टग्रहाः सन्ति तर्हि श्रवणं न्यूनं भवति। तृतीयभावस्य फलं षष्ठभावः सदृशः भवति।

**दयूनेऽर्कजेऽहो नवमेऽस्र आयगे सहोत्थहानिः सहजे शनावपि।**
**बुधेज्यशुक्राः सहजे तु तत्सुखं द्वयोःक्षयो दृष्टयुतीक्षणात्रृणाम्॥**
**चन्द्रे तु भाग्ये सहजेऽर्कजश्चेद्वागौ शुभैर्दृष्टयुते तृतीये।**
**तद्वद्विनश्येद्भगिनीत्रयं वै चिह्नं तु बाह्वोरथवापि कुक्षौ॥**
**सोदरी राहुदृष्टे सिते भ्रातृगे दुर्विपात्स्याव्द्यसुस्तत्र चेन्मन्ददृक्।**
**सर्पभिरप्युदीर्याथ कर्णे खलैः कर्णमांद्यं परं षष्ठतुल्यं फलम्॥[xvii]**

**वि.द्र.-** शनिराहुभौमानां अत्रोक्तानां स्थितिषु जातकस्य भातृद्वयस्य त्रितयस्य वा हानि भवति इति शम्भुहोरायाम् उक्तमस्ति। तत्र बुधः, बृहस्पतिः, शुक्रः च स्थितिवशात् त्रयाणां भातृणां सौख्यं स्यात्। यथा-

**लाभे महीजे मदनेऽर्कपुत्रे विधुन्तुदश्चेन्नवमे तदानीम्।**
**हानिः प्रवाच्या विबुधैर्नराणां भ्रातृद्वयस्य त्रितयस्य वापि॥**
**गुरुस्तृतीये भृगुजो बुधो वा सौख्यं त्रयाणां च सहोत्थितानाम्।**
**वाच्यं खलैर्दृष्टयुतोऽथवा चेद् द्वयोर्विनाशं विबुधैस्तदानीम्॥[xviii]**

तृतीयभावस्य फलं षष्ठभावः सदृश इति शम्भुहोरायामपि उक्तमस्ति परन्तु तत्र विशेषरूपेण षष्ठभावे यत्फलं मातुलं प्रति भवति तादृशं सर्वं फलं तृतीयस्थैः ग्रहयोगैः भ्रातरं प्रति भवति। यथा –

**पष्ठस्थानस्थैः ग्रहैर्मातुलानां प्रोक्तं नूनं यादृशं यत्फलं तत्।**
**दुश्चिक्यस्थैः तादृशं वाऽनुजानां वाच्यं सर्वं हौरिकैर्बुद्धिमद्भिः॥ [xix]**

**उपसंहारः -** अस्य शोधलेखस्य समग्रविवेचनात् इदं सुस्पष्टं भवति यत् होराशास्त्रे भ्रातृविचारः केवलं तृतीयभावस्थितिग्रहाणां साधारणपरिगणनया न सिद्ध्यति, अपि तु तृतीयभावस्य, तृतीयेशस्य, भ्रातृकारकग्रहस्य (भौमस्य), तेषां बलाबलविवेकस्य, शुभाशुभदृष्टियुतिसम्बन्धानां च समन्वितविश्लेषणेन एव यथार्थतया निर्णयः। **संकेतनिधिः**, **शम्भुहोरा**, **सर्वार्थचिन्तामणिः**, **फलदीपिका**, **मानसागरी**, **जातकपारिजात** इत्यादिषु प्राचीनहोराग्रन्थेषु भ्रातृविषये प्रतिपादिताः सिद्धान्ताः परस्परं पूरकत्वेन अवस्थिताः सन्ति। अध्ययनेन ज्ञायते यत् तृतीयभावः सहोदरसम्बन्धानां मूलकेन्द्रं सन्, भ्रातृसौख्यदुःखयोः, भ्रातृसंख्याविनाशयोः, शरीरिकचिह्नरोगादीनां च निर्णये प्रमुखभूमिकां निर्वहति। शुभग्रहैः दृष्टे युते च तृतीयभावे, तथा बलिनि तृतीयेशे एवं शुभस्थिते भ्रातृकारके भौमे भ्रातृवृद्धिः, पारस्परिकसौहार्दं, साहाय्यं च सम्भवति। तद्विपरीते, पापग्रहप्राबल्ये विशेषतः शनिराहुकुजादीनां क्रूरदृष्टियुतौ भ्रातृहानिः, अरिष्टप्रसङ्गः, शरीरिकविकृतयः, तथा भ्रातृसम्बन्धेषु वैर्यं च दृश्यते।
विशेषरूपेण शम्भुहोरायां प्रतिपादितं यत् तृतीयभावस्य फलं षष्ठभावसदृशं भवति, तत् भ्रातृविचारस्य व्यावहारिकव्याख्यायां महत्त्वपूर्णं स्थानं धारयति। यत्र षष्ठभावे मातुलविषयकानि फलानि उक्तानि, तानि एव तृतीयभावे ग्रहयोगविशेषेण भ्रातृविषये प्रवर्तन्ते इति सिद्धान्तः अस्मिन् शोधे स्पष्टतया प्रतिपादितः। अतः एतत् शोधनिबन्धः सूक्ष्मः, बहुस्तरीयः, समग्रविश्लेषणापेक्षी च इति निश्चयेन प्रतिपन्नम्।

**Creative Commons (CC) License**
This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–Non-Commercial–No Derivatives 4.0 International (CC BY-NC-ND 4.0) license. This license permits sharing and redistribution of the article in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and source. No modifications, adaptations, or derivative works are permitted under this license.

[i] सङ्केतनिधिः/ चतुर्थसंकेतः/ १८
[ii] सङ्केतनिधिः/ चतुर्थसंकेतः/ १९
[iii] फलदीपिका/ १६/ ८
[iv] सर्वार्थचिन्तामणी/ ४/ १६-१७
[v] सर्वार्थचिन्तामणी/ ४/ १८
[vi] सङ्केतनिधिः/ चतुर्थसंकेतः/ २ ०- २१
[vii] शम्भुहोराप्रकाश/ ६/ ५२ - ५२
[viii] सर्वार्थचिन्तामणी/ ४/ २७
[ix] सारावली/ ३४/ २३
[x] शम्भुहोराप्रकाश/ ६/ ५४
[xi] सङ्केतनिधिः/ चतुर्थसंकेतः/ २२-२३
[xii] शम्भुहोराप्रकाश/ ६/ ५७
[xiii] मानसागरी/२/ ५८
[xiv] मानसागरी/ ४/३४९
[xv] मानसागरी/२/११८
[xvi] शम्भुहोराप्रकाश/ ६ / ६१
[xvii] सङ्केतनिधिः/ चतुर्थसंकेतः/ २४ - २६
[xviii] शम्भुहोराप्रकाश/ ६/ ६२,६३
[xix] शम्भुहोराप्रकाश/ ६/ ६६

© 2024 Lakshmikanta Nayaka. This is an open access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND) https://creativecommons.org/licenses/by/4.0/